सैवेयं दीपकलिकेति प्रत्यभिज्ञानवद्भ्रान्तित्वात्। प्रदीपप्रत्यभिज्ञाऽपि भ्रमैव, ह्रस्वत्वदीर्घत्वे परस्परादविनाशशालिनी इति चेन्न तद्विनाशस्याश्रयविनाशमन्तरेणानुपपत्तेरुक्तत्वात्। तत् किं पार्थिवपरमाणुरूपादिवत् परमाणुगतमणुत्वं शब्दबुद्ध्यादिवदाकाशादिगतं महत्त्वमपि नश्यतीत्यत आह उप०ह०। "नित्ये नित्यम्" सू० "नित्येष्वाकाशादिषु परमाणुषु च यत् परिमाणं तन्नित्यं विनाशकाभावात्" उप० ह०।

सांख्यसूत्रभाष्ययोस्तु परिमाणद्वैविध्यं व्यवस्थापितं यथा "न परिमाणचातुर्विध्यं द्वाभ्यां तद्योगात्" सू०। "अणु महद्दीर्घं ह्रस्वमिति परिमाणचातुर्विध्यं नास्ति। द्वैविध्यं तु वर्त्तत एव द्वाभ्यां तद्योगात् द्वाभ्यामेवाणुमहत्परिमाणाभ्यां चातुर्विध्यसम्भवादित्यर्थः। महत्परिमाणस्यावान्तरभेदावेव हि ह्रस्वदीर्घौ। अन्यथा क्रवादिरूपैः परिमाणानन्त्यप्रसङ्गादिति। तत्राणुत्वेऽणुपरिमाणमाकाशस्य कारणं गुणविशेषं वर्जयित्वा भूतेन्द्रियाणां मूलकारणेषु सत्त्वादिगुणेषु मन्तव्यम्। अन्यत्र यथायोग्यं मध्यमादिपरममहत्त्वान्तपरिमाणानि तानि च महत्त्वस्यैवावान्तरभेदा इति"।

दीर्घत्वे कारणञ्च पार्श्वतोयोजितावयवबाहुल्यादिकम् स्थूलत्वे तु अर्द्धाधःस्थितावयवबाहुल्यादिकमिति भेदः। कालस्य दीर्घत्वप्रयोजकं तदुपाधेर्बहुकालस्थायित्वं तदभिप्रेत्यैव "दीर्घकालनैरन्तर्यादरसेवितात्" योगशास्त्रे "दीर्घयामा त्रियामा" इति काव्ये च प्रयोगः। २व्याकरणपरिभाषिते द्विमात्रकालेनोच्चार्ये (आ ई ऊ) प्रभृतौ वर्णे च। "ऊकालोऽज्ह्रस्वदीर्घप्लुतः" पा० "एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्" शिक्षा। "गुहानिबद्धप्रतिशब्ददीर्घम्" रघौ शब्दस्य गुणत्वेऽपि दीर्घत्वं बहुकालस्थायित्वेन भाक्तम्। एवं "हृदयकुसुमशोषी दारुणोदीर्घशोकः" "सा दीर्घं रोदिति विच्छिपत्यत इतः श्यामा भुजावल्लरीम्" सा०द० शोकरोदनयोर्दीर्घत्वं बहुकालस्थायित्वाद् भाक्तमेव। ३तालशालवृक्षे ४उत्कटे पु० रत्नमाला। ५रामशरे पु०६उष्ट्रे पुंस्त्री० राजनि० स्त्रियां जातित्वात् ङीष्। "वृश्चिककन्याम्गपतिवणिजो दीर्घाः" ज्यो०त० उक्तेषु ७सिंहकन्यातुलावृश्चिकराशिषु पु०।

**दीर्घकणा** स्त्री नित्यकर्म०। श्वेतजीरके राजनि०।

**दीर्घकण्टक** पु०दीर्घः कण्टको यस्य। वर्वुरे (वावला) राजनि०

**दीर्घकण्ठ** पुंस्त्री० दीर्घः कण्ठो यस्य। १वके शब्दच० स्त्रियां जातित्वात् ङीष्। २दानवभेदे पु० ३आयतकण्ठकमात्रे त्रि० "विस्वरोदीर्घकण्ठश्च मद्यपो मारुताशनः" हरिवं०२४०अ० कर्म०। ४आयते कण्ठे पु०। व कप्। दीर्घकण्ठक। वकखगे शब्दच०

**दीर्घकन्द** न०दीर्घः कन्दोऽस्य। १मूलके। दीर्घः कन्दो यस्याः कप् अत इत्त्वम्। दीर्घकन्दिका २मूषल्याम् स्त्री राजनि०।

**दीर्घकन्धर** पुंस्त्री दीर्घः कन्धरोऽस्य। १वकखगे राजनि०। स्त्रियां ङीष्। २दीर्घकन्धरयुक्ते त्रि० कर्म०। ३दीर्घे कन्धरे पु०।

**दीर्घकाण्ड** पु० दीर्घः काण्डोऽस्य। १गुण्डतृणे २पातालगरुडीलतायां ३तिक्ताङ्गायां स्त्री राजनि०।

**दीर्घकील** पु०दीर्घः कीलो यत्र। १अङ्कोटकेवृक्षे वा कप्। दीर्घकीलक तत्रैवार्थे कर्म०। २दीर्घे कीले पु०न०।

**दीर्घकूर** न०दीर्घं कूरम्। आम्र्द्देशोद्भवे शालिभेदे राजान्ने राजनि०

**दीर्घकेश** पुंस्त्री०दीर्घः केश इव लोमास्य। १भल्लूके राजनि० स्त्रियां जातित्वात् ङीष्। २आयतकेशयुते त्रि० स्त्रियां स्वाङ्गत्वात् वा ङीष्। "दीर्घकेशी सुमध्या" इत्युद्भटकम् इ०सं०१४अ०कूर्म्मविभागे उक्ते पश्चिमोत्तरदिकस्थे ३देशभेदे च यथा "एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च"।

**दीर्घकोशि(षि)का** स्त्री दीर्घः को(शो)षो यस्याः कप् अतइत्त्वम् (झिनुक) शुक्तिमायाम् अमरः। तालव्यमध्योऽपि भरतः।

**दीर्घगति** पु०दीर्घा गतिरस्य। १उष्ट्रे राजनि० तस्य पादविक्षेपस्य बहुदेशान्तरितत्वात्तथात्वम्। [राजनि०।

**दीर्घग्रन्थि** पु० दीर्घो ग्रन्थिः पर्व यस्य। गजपिप्पल्याम्।

**दीर्घग्रीव** पुंस्त्री०दीर्घा ग्रीवा यस्य। १उष्ट्रे राजनि०२नीलक्रौञ्चे हेमच०। स्त्रियां जातित्वात् ङीष्। ३पश्चिमोत्तरदिकस्थे देशभेदे पु० दीर्घकेशशब्दे दृश्यम्। [माला।

**दीर्घघाटिक** पुंस्त्री० दीर्घा घाटाऽस्त्यस्य ठन्। १उष्ट्रे शब्द-

**दीर्घचञ्चु** पु० दीर्घा चञ्चुरस्य। खगभेदे पारस्करनि०।

**दीर्घच्छद** पु०दीर्घाश्छदा यस्य। १इक्षौ शब्दार्थचि०। २दीर्घच्छदके त्रि० कर्म्म०। ३दीर्घे छदे पु०।

**दीर्घजङ्गल** पुंस्त्री० नित्यकर्म०। भङ्गानमत्स्ये (भाङ्गन) शब्दमाला स्त्रियां ङीष्।

**दीर्घजङ्घ** पुंस्त्री० दीर्घा जङ्घा यस्य। १उष्ट्रे जटाध०।